Reg. No. : ....................................

Name : .......................................

**Code No. 9045**

**Second Year – March 2018**

Time : 2½ Hours
Cool-off time : 15 Minutes

Part – III

**SANSKRIT SAHITYA**

Maximum : 80 Scores

***General Instructions to Candidates :***

- There is a 'Cool-off time' of 15 minutes in addition to the writing time.
- Use the 'Cool-off time' to get familiar with questions and to plan your answers.
- Read questions carefully before answering.
- Read the instructions carefully.
- Calculations, figures and graphs should be shown in the answer sheet itself.
- Give equations wherever necessary.
- Electronic devices except non-programmable calculators are not allowed in the Examination Hall.

**निर्देशा** :

1. सर्वे प्रश्ना: समाधेयाः ।
2. प्रश्नान् प्रश्ननिर्देशान् च सावधानं पठित्वा उत्तरं लिखत ।
3. प्रश्नानां वाचनाय 15 निमेषा: अधिकतया कल्पिता: ।

**1.** मञ्जुषायाः प्रश्नानां उत्तराणि चित्वा लिखत । **(Scores : 4 × 1 = 4)**

| |
|---|
| चन्द्रापीड़चरितम्, विचित्ररूपः, नारायणीयम्, मैत्रेयः, नैषधीयम्, श्वेतकेतुः |

(क) विष्णोः चरितं निर्वर्ण्य नारायणभट्टपादेन लिखितं काव्यं किम् ?

(ख) कृष्णस्य अनुग्रहः कीदृशः ?

(ग) चारुदत्तस्य आत्ममित्रस्य नाम किम् ?

(घ) कादम्बरीकथायाः संग्रहरूपस्य ग्रन्थस्य नाम किम् ?

**2.** कोष्ठकात् समुचितम् उत्तरं चित्वा पूरयत । **(Scores : 5 × 1 = 5)**

(क) _______ मौनमुद्राम् अतनुत ।

[बलरामः, श्रीकृष्णः, अर्जुनः]

(ख) उपमा कालिदासस्य, भारवेः ________ ।

[पदलालित्यम्, अर्थगौरवम्, अलङ्कारचारुता]

(ग) अजानां संख्या ________ उपेष्यति तदा प्रत्यागच्छ ।

[शतम्, सहस्रम्, अयुतम्]

(घ) कीर्तिरिव _______ अभिकाम्याः ।

[मृगेषु, वृक्षेषु, मनुजेषु]

(ङ) नोबल् पुरस्कारेण सम्मानितं टागोर–महाशयस्य काव्यं _______ भवति ।

[गीताञ्जली, भग्नहृदयम्, प्रतिध्वनिः]

3. **यथोचितं योजयत ।** **(Scores : 5 × 1 = 5)**

| क | ख |
|---|---|
| रसपद्धतिः | कुन्तकः |
| रीतिपद्धतिः | क्षेमेन्द्रः |
| ध्वनिपद्धतिः | भरतः |
| वक्रोक्तिपद्धतिः | आनन्दवर्धनः |
| औचित्यपद्धतिः | वामनः |

4. **अधोरेखाङ्कितपदस्य स्थाने समानार्थकपदं पेटिकातः चित्वा लिखत ।** **(Scores : 2 × 1 = 2)**

| वाणीम्, भूमिम्, कारणे |
|---|

(क) दारिद्र्यस्य निदाने प्रहरः ।

(ख) रघोः गां निशम्य कौत्सः अवोचत् ।

5. **रिक्तस्थानानि पूरयत ।** **(Scores : 3 × 1 = 3)**

(क) तथा + ______ = तथैव ।

(ख) ______ + उपेत्य = किलोपेत्य ।

(ग) वसन् + _______ = वसन्नपि ।

6. प्रदत्तंश्लोकं पठित्वा स्ववाक्यैः आशयं लिखत । **(Scores : 5 × 1 = 5)**

श्रृणुत श्रृणुत सर्वे पाण्डुसूनोः प्रतिज्ञां
सदसि पुनरपत्यं भाविभूमीसुरस्य ।
करधृतशरचापः पालयिष्यामि नो चेत्
सकलजनसमक्षं सन्निवेक्ष्ये हुताशम् ।।

7. प्रदत्तं गद्यभागं पठित्वा प्रश्नानाम् उत्तराणि लिखत । **(Scores : 5 × 1 = 5)**

महाकवेः भारवेः जीवितकालः क्रिस्तोः परं सप्तमे शतके आसीत् । सः दाक्षिणात्यः शैवधर्मावलम्बी इति च मन्यते । सः सिंहविष्णुरिति नृपस्य आश्रितः आसीत् । किरातार्जुनीयम् इति एकेन काव्येन सः विश्वविख्यातः अभवत् । सर्गाणामन्ते लक्ष्मीपदप्रयोगात् लक्ष्मीपदलाञ्छनः इति तस्य प्रथा लब्धा ।

(क) केन काव्येन भारविः विश्वविख्यातः अभवत् ?

(ख) भारवेः अपरं नाम किम् ?

(ग) भारविः कस्य नृपस्य आश्रितः आसीत् ?

(घ) सर्गान्ते लक्ष्मीपदप्रयोगात् भारवेः लब्धा प्रथा का ?

(ङ) कविर्भारविः कस्मिन् शतके जनिमलभत ?

8. प्रदत्तं सम्भाषणांशं प्रदेशिकभाषया आङ्गलभाषया वा अनुवदत । **(Scores : 5 × 1 = 5)**

विदूषकः – किमिदं चिन्त्यते ?

चारुदत्तः – यः दारिद्र्यम् अनुभवति सः मृतः जीवति ।

विदूषकः – दारिद्र्यात् मरणात् वा किं इच्छति ?

चारुदत्तः – मरणं मे रोचते ।

विदूषकः – अलं सन्तपितेन ।

9. प्रदत्तं गद्यभावं संगृह्य लिखत । **(Scores : 6 × 1 = 6)**

अतीतेषु हायनेषु सः कौतुकेन हेतुना अजानां गणनां कृतवान् । प्रभूतम् अजवृन्दं गुरोः निर्देशम् अतिक्रम्य वर्तते इति ज्ञातवान् । सः मृग–पक्षीन् उपेक्ष्य गन्तुमशक्तः अभवत् । किन्तु गुरु–निर्देशं पालयितुम् आश्रममगच्छच्च ।

शिष्यदर्शनेन गुरुः प्रीतमानसः संजातः । सः गुरुः तं युवकं पुनः पुनः अनुगृह्य पितुस्सकाशं प्राहिणोत् । तं वीक्ष्य च वृद्धः पिता 'विनयसम्पन्नः संवृत्तः मे पुत्रः' इति आनन्दम् अविन्दत ।

गाढाश्लेषैः सह पिता स्वकीयम् अनुग्रहं अदात् ।

**10. प्रदत्तयोः एकस्य कथापात्रनिरूपणं कुरुत ।** **(Scores : 5 × 1 = 5)**

(क) चारुदत्तः ।

सूचनाः – दरिद्रः नायकः, दुःखानुभवेन हताशः विनष्टसौहृदः ।

(ख) मैत्रेयः ।

सूचनाः – विदूषकः, नायकस्य आत्ममित्रम्, सुहृदः दैन्यतया दुःखितः ।

**11. प्रदत्तयोः विभागयोः एकस्य उत्तरं लिखत ।** **(Scores : 5 × 1 = 5)**

**क**

प्रदत्तं वाक्यं पठित्वा तदाशयप्रतिपादकं श्लोकांशं चित्वा लिखत ।

**वाक्यानि :**

(1) यशः एव मनुजेषु अभिलषणीयम् ।

(2) शरीरं स्वीकृतं इति निन्द्यं किम् ?

(3) श्रोत्राणि शब्दग्रहणे असमर्थानि ।

(4) श्वेतवर्णयुक्ताः असदृशाम् अभिवृद्धिम् आयुः ।

(5) पारतन्त्र्यं मरणादपि भयानकम् ।

**श्लोकांशाः**

(1) कीर्तिरिव मनुजेष्वभिकाम्या ।

(2) श्रोतुमत्र बधिरा इव कर्णाः ।

(3) वृद्धिमापुरतुलां सितगात्राः ।

(4) पारतन्त्र्यं मानिनान्तु मृत्योरपि भयानकम् ।

(5) मूर्तिमत्वमथवा किमु गर्ह्यम् ?

ख

प्रदत्तस्य श्लोकस्य आशयं स्ववाक्यैः लिखत ।

पान्थवेश्मनि च भोजनगेहे
पार्थवर्णरहितत्वमुपेताः ।
कीर्तनीयगुणिनो वयमार्ताः
मूर्तिमत्वमथवा किमु गर्ह्यम् ।

12. प्रदत्तेषु इष्टतमं गीतं किम् इति सयुक्तिकं प्रतिपादयत । **(Scores : 5 × 1 = 5)**

(क) अद्य प्रार्थनमेतत् त्वां प्रति
मामकमस्ति विभो ।
प्रहर प्रहर निदाने मम
हृदि दारिद्र्यस्येति ।।

(ख) सुखानि दुःखान्यपि लघु सोढुं
शक्तिं मम देहि ।
प्रणयं सफलयितुं परिचरणे
शक्तिं मम देहि ।।

13. प्रदत्तयोः एकस्य टिप्पणीं लिखत । **(Scores : 4 × 1 = 4)**

(क) रघोः अतिथिसत्कारः ।

(ख) रघुवंशमहाकाव्यम् ।

14. अधोलिखितात् वाक्यात् क्त्वान्त–ल्यबन्त–तुमुन्नन्तपदानि चित्वा लिखत । **(Scores : 3 × 1 = 3)**

विद्यां समाप्य गुरुदक्षिणां दातुम् उत्सुकः कौत्सः गुरोः समीपं गत्वा प्रर्थितवान् ।

15. कथास्तम्भं क्रमीकुरुत । **(Scores : 6 × 1 = 6)**

- चतुर्दशीति मुनिकुमारः शिवम् उपासितुम् आगतः ।
- महाश्वेता अम्बया समम् अच्छोदं सरः स्नातुम् आगता ।
- नन्दनवनदेवता पारिजातकुसुममञ्जरीम् अदात् ।
- मुनिकुमारकम् अपश्यत् ।
- अशेषजनपूजनीया चेयं जातिः ।
- पुण्डरीक इति नाम चक्रे ।

16. प्रदत्तयोः **एकस्य** सन्दर्भं स्पष्टीकुरुत । **(Scores : 4 × 1 = 4)**

(क) भगवन् ! गृहाण तवायमात्मजः ।

(ख) यदि रुचितपरिमला गृह्यतामियम् ।

17. ‘क’ विभाग ‘ख’ विभागयोः **एकस्य** उत्तरं लिखत । **(Scores : 4 × 2 = 8)**

**क**

प्रदत्तेषु काव्यतत्त्वेषु द्वयोः टिप्पणीं लिखत ।

(क) ध्वनिपद्धतिः

(ख) रसपद्धतिः

(ग) रीतिपद्धतिः

ख

प्रदत्तेषु काव्यतत्त्वदर्शिषु द्वयोः टिप्पणीं लिखत ।

(क) आनन्दवर्धनः

(ख) कुन्दकः

(ग) क्षेमेन्द्रः

---

## SECOND YEAR HIGHER SECONDARY EXAMINATION MARCH 2018

SUBJECT: Sanskrit Sahithya CODE. NO: 9045

| Qn No | Sub Qns | Answer Key/Value Points | Score | Total |
|---|---|---|---|---|
| 1 | क | "नारायणीयम्" इति लेखनाय | 1 | 4 |
| | ख | "विचित्ररूप:" इति लेखनाय | 1 | |
| | ग | "मैत्रेय:" " " | 1 | |
| | घ | चन्द्रापीडचरितं " " | 1 | |
| 2 | क | "श्रीकृष्ण:" इति लेखनाय | 1 | 5 |
| | ख | अर्थगौरवं " " | 1 | |
| | ग | सहस्रम् " " | 1 | |
| | घ | मनुजेषु " " | 1 | |
| | ङ | गीताञ्जलि: " " | 1 | |
| 3 | | रसपद्धति: - भरत:, | 1 | 5 |
| | | रीतिपद्धति: - वामन: | 1 | |
| | | ध्वनिपद्धति: - आनन्दवर्धन: | 1 | |
| | | वक्रोक्तिपद्धति: - कुन्तक: | 1 | |
| | | औचित्यपद्धति: - क्षेमेन्द्र: | 1 | |
| 4 | | निदानं - कारणं | 1 | 2 |
| | | * गां - वाणीं, भूमिं वा ( प्रश्ने स्खालित्यमस्ति। भूमिं वाणीं इति लेखनाय) | 1 | |
| 5 | क | तेषां + पुन इति विश्लेषणाय | 1 | 3 |
| | ख | किल + उपेत्य " " | 1 | |
| | ग | वसन् + अपि " " | 1 | |
| 6 | | सङ्क्षिप्ताशय लेखनाय | 5 | 5 |

| Qn No | Sub Qns | Answer Key/Value Points | Score | Total |
|---|---|---|---|---|
| 7 | क | किरातार्जुनीयं इति लेखनाय | 1 | |
| | ख | *प्रश्नस्योत्तरं खण्डिकायां नास्ति पूर्णाङ्काः देयाः | 1 | |
| | ग | सिंहविष्णुः इति लेखनाय | 1 | 5 |
| | घ | लक्ष्मीपदलाञ्छनः इति लेखनाय | 1 | |
| | ङ | सप्तमे शतके " " | 1 | |
| 8 | | पदानुपदः अनुवादः न गणनीयः । आशयम् अस्ति चेत् पूर्णाङ्काः देयाः । | 5 | 5 |
| 9 | | गद्यभागस्य संगृह्य लेखनाय | 6 | 6 |
| 10 | | प्रकरण कथापात्रनिरूपणस्य कृते | 5 | 5 |
| 11 | (क) 1 | कीर्तिरेव मनुजत्वमिकाम्या इति लेखनाय | 1 | |
| | 2 | मूर्तिमत्त्वमथवा किमु गर्ह्यम् " " | 1 | |
| | 3 | श्रोतुमत्र बधिरा इव कर्णाः " " | 1 | 5 |
| | 4 | वृद्धिमापुरतुला सितगात्राः | 1 | |
| | 5 | पारतन्त्र्यम् मानिनान्तु मृत्योरपि भयानकं इति लेखनाय | 1 | |
| | | OR | OR | |
| | (ख) | आशयलेखनाय | 5 | |
| 12 | | श्लोकचयनाय | 2 | 5 |
| | | सन्दर्भिक प्रतिपादनं प्रति | 3 | |
| 13 | | आमुख लेखनाय | 1 | 4 |
| | | आशयं समुचितं प्रति | 3 | |

| Qn No | Sub Qns | Answer Key/Value Points | Score | Total |
|---|---|---|---|---|
| 14 | | क्त्वान्तम् - गत्वा ल्यबन्तम् - समाप्य<br>तुमुन्नन्तम् - दातुम् | 1 x 3 | 3 |
| 15 | | * कथास्तम्भानां क्रमीकरणं छात्राणां क्लिष्टता स्यात् । अपूर्णत्वात् प्रश्नस्य । अतः सामान्यतया क्रमीकरणं कृते सति पूर्णाङ्काः देयाः | 6 | 6 |
| 16 | | आमुखलेखनं सति<br>सन्दर्भविशदीकरणं | 1<br>3 | 4 |
| 17 | क, ख | देयाः अन्यतरस्य समुचितटिप्पणी लेखनाय | 8 | 8 |
| | | आहत्य | 80 | 80 |